# shrIrAmachAritramanjarI

# શ્રીરામચારિત્રમઞ્જરી

## Document Information

Text title : rAmachAritramanjarI

File name : rAmachAritramanjarI.itx

Category : raama

Location : doc_raama

Author : Shri Raghavendra Swami

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : May 16, 2011

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

shrIrAmachAritramanjarI

# શ્રીરામચારિત્રમઞ્જરી

શ્રીમત્સુધીન્દ્રકરકમલસઞ્જાત - શ્રીમદ્રાઘવેન્દ્રયતિકૃતા

Shri Raghavendra Swami (1595-1671) was a great scholar and devotee. His original name was Venkanna or Venkatanatha. As a young boy he was a brilliant student. He learnt dvaita philosophy, grammer and shastras under his spiritual guru Shri Sudhendra theerta. His guru noted his great devotion and intelligence and chose him to be his successor. He later took sanyasa in 1621 at Tanjore. He travelled extensively He popularised Vaishnavism and the Dvaita philosophy of Saint Madhavacharya. He wrote many texts on philosophy. He is considered to be the avatar (reincornation) of Prahlada, the son of Hiranyakasipu who was killed by Sri Narasimha. Many miracles are attributed to him. On Dwitiya Day of Sravana Krishna PakSha in 1671, Raghavendra Swami gave a soul-stirring speech to hundreds of devotees who had gathered to watch his entering samadhi. Some of his advice to his devotees are as follows

1. One cannot get right thinking without without right living.
2. Social work done for the good of the people also constitutes worship of the Lord.
3. One should keep away from people who merely perform miracles.
4. Right knowledge is greater than any miracle.
5. Have devotion to the Lord. But devotion should never be blind faith.

Sri Raghavendra Swami attained Jeeva samadhi in 1671. This date is celebrated each year as Sri Raghavendra Swami Aradhana at Brindavans all over the world. The Raghavendra Math in Mantralaya housing his Brindavan is visited by thousands of devotees every year. His samadhi at Mantralayam in Andhrapradesh is a place of tourism that attracts large number of

devotees who believe that his prescence is still available at his samadhi.
The following poem composed by the saint narrates Shrimad Ramayana in eleven verses and is in the form of a hymn (stotra). By reciting this short poem one gets the benefit of reciting Shrimad Ramayana and also praying to Lord Rama.

અથ શ્રીરામચારિત્રમઞ્જરી ।

શ્રીમાન્ વિષ્ણુઃ પ્રજાતો દશરથનૃપતે રામનાથોઽથ નીતો
વિશ્વામિત્રેણ મન્ત્રાહૃદનુજસહિતસ્તાટકઘાતુકોઽસ્ત્રમ્ ।
બ્રાહ્માદ્યં પ્રાપ્ય હત્વા નિશિચરનિકરં યજ્ઞપાલો વિમોચ્યા-
હલ્યાં શાપાચ્ચ ભઙ્ક્ત્વા શિવધનુરુપયન્ જાનકીં નઃ પ્રસીદેત્ ॥ ૧॥

આયન્ રામઃ સભાર્યોઽધ્વનિ નિજસહજૈર્ભાર્ગવેષ્વાસરોષા-
દ્ધુત્વા સુરારિં પુરગ ઉત નુતસ્તાપસૈર્ભૂપપૃષ્ઠૈઃ ।
કલ્યાણાનન્તધર્મોઽગુણલવરહિતઃ પ્રાણિનામન્તરાત્મે-
ત્યાદ્યુક્તશ્ચાભિષેકે પુરજનમહિતો મહ્યતાં મે વચોભિઃ ॥ ૨॥

કૈકેયીપ્રીતિહેતોઃ સ સહજનૃપજોવલ્કલી યાનરણ્યં
ગઙ્ગાતારી ગુહાર્ચ્યઃ કૃતરુચિરજટો ગીષ્પતેઃ પુત્રમાન્યઃ ।
તીર્ત્વા કૃષ્ણાં પ્રયાતોઽવતુ નિજમમલં ચિત્રકૂટં પ્રપન્નં
સ્વામ્બાભિર્ભ્રાતરં તં શ્રુતજનકગતિઃ સાન્ત્વયન્ ન્યુપ્તતીર્થઃ ॥ ૩॥

દત્વાઽસ્મૈ પાદુકે સ્વે ક્ષિતિભરણકૃતૌ પ્રેષ્ય તં કાકનેત્રં
વ્યસ્યારાજ્યોઽત્રિનામ્નો વનમથ સમિતો દણ્ડકં તાપસેષ્ટમ્ ।
કુર્વન્ હત્વા વિરાધં ખલકુલદમનં યાચિતસ્તપસાગ્ર્યૈ-
સ્તેષાં દત્ત્વાઽભયં સ્વાનસિધનુરિષુધીન્ યાનગસ્ત્યાત્ સ પાયાત્ ॥ ૪॥

આસીનઃ પઞ્ચવટ્યામકુરુત વિકૃતાં રાક્ષસીં યો દ્વિસપ્ત-
ક્રવ્યાદાનપ્યનેકાનથ ખરમવધીદ્ દૂષણં ચ ત્રિશીર્ષમ્ ।
મારીચં માર્ગરૂપં દશવદનહૃતામાકૃતિં ભૂમિજાં યાં
અન્વિષ્યન્નાર્તગૃધ્રં સ્વગતિમથ નયન્ મામવેત્ ઘ્નન્ કબન્ધમ્ ॥ ૫॥

પમ્પાતીરં સ ગચ્છન્નિહ કૃતવસતિર્ભક્તિતુષ્ટઃ શબર્યૈ
દત્વા મુક્તિં પ્રકુર્વન્ હનુમત ઉદિતં પ્રાપ્તસુગ્રીવસખ્યઃ ।
સપ્ત ચ્છિત્વા સાલાન્ વિધિવરબલિનો વાલિભિત્સૂર્યસૂનું
કુર્વાણો રાજ્યપાલં સમવતુ નિવસન્ માલ્યવત્કન્દરેસૌ ॥ ૬॥

નીત્વા માસાન્ કપીશાનિહ દશ હરિતઃ પ્રેષ્ય સીતાં વિચિત્યા-
યાતશ્રીમદ્ધનૂમદ્ગિરમથ સમનુશ્રુત્ય ગચ્છન્ કપીન્દ્રૈઃ ।
સુગ્રીવાદ્યૈરસઙ્ખ્યૈર્દશમુખસહજં માનયન્નબ્ધિવાચા
દૈત્યઘ્નઃ સેતુકારી રિપુપુરરુદવેદ્ધાનૈર્વૈરિઘાતી ॥ ૭॥

ભગ્નં કૃત્વા દશાસ્યં ગુરુતરવપુષં કુમ્ભકર્ણં નિહત્ય
પ્રધ્વસ્તાશેષનાગં પદકમલનતં તાર્ક્ષ્યમાનન્ધ રામઃ ।
સર્વાનુજ્જીવયન્તં ગિરિધરમનઘશ્ચાઞ્જનેયં કપીન્ સ્વાન્
વિજ્ઞાનાસ્ત્રેણ રક્ષન્ સમવતુ દમયંલ્લક્ષ્મણાચ્છક્રશત્રુમ્ ॥ ૮॥

ક્રવ્યાદાન્ ઘ્નન્સઙ્ખ્યાનપિ દશવદનં બ્રહ્મપૂર્વૈઃ સુરેશૈઃ
પુષ્પૈરાકીર્યમાણો હુતવહવિમલમાપ્ય સીતાં વિધાય ।
રક્ષોનાથં સ્વભક્તં સ્વપુરમથ ગતઃ પુષ્પકસ્થઃ સમસ્તૈઃ
સામ્રજ્યે ચાભિષિક્તો નિજજનમખિલં માનયન્ મે ગતિઃ સ્યાત્ ॥ ૯॥

રક્ષન્ ક્ષોણીં સમૃદ્ધાં નુત ઉત મુનિભિર્માનયન્ વાયુસૂનું
પ્રેષ્યાદિત્યાત્મજાદીન્ વ્યતનુત ભરતં યૌવરાજ્યેઽનુમાન્ય ।
કાર્યે સૌમિત્રિમાર્તશ્વગદિતકૃદરિઘ્નોઽથ શત્રુઘ્નો યો
હત્વાઽસૌ દુષ્ટશૂદ્રં દ્વિજસુતગુબવેત્ કુમ્ભજાન્માલભારી ॥ ૧૦॥

યજ્ઞં તન્વન્ ત્રિકોટીર્વ્યતુદત ભરતાદ્યૈઃ સુરાનીશવાક્યા-
દ્યાસ્યન્ ધામાત્રિપુરં ભુજિમથ સ નયન્નાત્મસૂન્ સ્વરાજ્યે ।
કૃત્વા શ્રીહ્રીહનૂમદ્ ધૃતવિમલચલચ્ચામરચ્છત્રશોભી
બ્રહ્માદ્યૈઃ સ્તૂયમાનો નિજપુરવિલસત્પાદપદ્મોઽવતાન્મામ્ ॥ ૧૧॥

ઇતિ શ્રીરામચરિત્રમઞ્જરી લેશતઃ કૃતા ।
રાઘ્વેન્દ્રેણ યતિના ભૂયાદ્રામપ્રસાદદા ॥ ૧૨॥

॥ ઇતિ શ્રીમત્સુધીન્દ્રકરકમલસઞ્જાત રાઘવેન્દ્રયતિકૃતા
શ્રીરામચારિત્રમઞ્જરી સમ્પૂર્ણા ॥

Encoded and proofread by N.Balasubramanian bbalu at sify.com

*shrIrAmachAritramanjarI*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*